ॐ

श्री ॥ श्री गुं गुरुभ्यो नमः ॥ 17

श्री विद्यामंदिर ग्रंथमाला द्वारा प्रकाशित

॥ श्रीक्रमः ॥

नवसंस्कारित पुनरावृत्ति

: शुद्धिकर्ता :

श्री नारायण सीताराम भट्ट (अड्वोके

: संपादन एवं संकलन :

सोमनाथ न

कपिलराय न

पौष शुक्ल पूर्णिमा मान

दिनांक : २७-१-१९५?

प्रका ... क :

कपिलराय ना. ठाकुर इन्दुलाल का. शेठ

२, सूर्यसदन, ... रोड, पार्ले, प्रकाश प्रिन्टींग प्रेस

लीमडाचोक सुरत-१

सिंहासनस्थित श्रीमन्महात्रिपुरसुंदरी

प. पू. परमगुरुवर्य

श्री सीताराम गणेश भट बी. ए.

प. पू. गुरुवर्य

अग्निहोत्री याज्ञिकमार्तंड
शुक्ल श्रीमहाशंकर घेलाभाई
उर्फ छनुभाई

ॐ

॥ श्री गुं गुरुभ्यो नमः ॥

श्री विद्यामंदिर ग्रंथमाला द्वारा प्रकाशित

卐 ॥ श्रीक्रमः ॥ 卐

नवसंस्कारित पुनरावृत्ति

(केवल परंपरायुक्त भक्तानां सदुपयोगार्थे)

: शुद्धिकर्ता :

श्री नारायण सीताराम भट्ट (अेडवोकेट)

: संपादन एवं संकलन :

सोमनाथ नन्दशंकर भट्ट

कपिलराय नानालाल ठाकुर (प्रकाशक)

वामनद्वादशी, वि. सं. २०३०, शुक्रवार, दिनांक : २७-९-'७४

। हरि ॐ तत्सत् ।

श्री गुरु अष्टक

ब्रह्मस्थान सरोज मध्य विलसच्छीतांशु पीठस्थितम्।
स्फुर्जित्सूर्य रुचिवराभयकरं कर्पूर कुन्दोज्ज्वलम्॥
श्वेत स्रग्वसनानु लेपनयुतं विद्युद्रुचा कान्तया।
संश्लिष्टार्धतनुं प्रसन्नवदनं वंदे गुरुं सादरम्॥ १॥

मोहध्वान्त महान्ध विग्रहवतां चक्षूंषि चोन्मीलयन्
यश्चक्रे रुचिराणि तानि च महाज्ञानां जनाभ्यंजनैः॥
व्याप्तं यन्महता जगत्त्रयमिदं तत्वप्रबोधोदयम्।
तं वंदे शिवरूपिणं निजगुरुं, सर्वार्थ सिद्धिप्रदम्॥ २॥

मातंगी भुवनेश्वरी च बगला धूमावती भैरवी।
तारा छिन्न शिरोधरा भगवती श्यामारमा सुन्दरी॥

दातुं न प्रभवंति वांछित फलं यस्य प्रसादं विना
तं वंदे शिवरूपिणं निजगुरुं सर्वार्थ सिद्धिप्रदम् ॥ ३ ॥

काशी द्वारवती प्रयाग मथुराऽयोध्या गयावंतिका।
माया पुष्कर कांचिकौशलपुरी श्रीशैल विंध्यादयः॥
नैते तारयितुं भवंति कुशल यस्यप्रसादं विना। तं वंदे ॥४॥

रेवासिन्धु सरस्वती त्रिपथगाः सूर्यात्मजा कौशिकी।
गंगासागर संगमाद्रितनया, लौहित्य शोणादयः॥
नालंयांति फलप्रदान विषये यस्य प्रसादं विना। तं वंदे ॥५॥

सत्कीर्ति विमलं यशः सुकविता पांडित्यमारोग्यता।
वादेवाक्पटुता कुलेचतुरता गांभीर्यमक्षोभ्यता॥
सौंदर्यं प्रभुता गुणे निपुणता यस्यप्रसादं विना। तं वंदे ॥६॥

लोकेशो हरिरंबिका स्मरहरो मातापिता रक्षकः ।
आचार्यःकुल पूजितो यतिवरो वृद्धस्तथा भिक्षुकः॥
नैते यस्यतुलां व्रजन्ति कलया कारूण्यवारान्निधिम् । तं वंदे ॥७॥

ध्यानंदैवत पुजनं गुरुतपो दानाग्नि होत्रादयः ।
पाठो होम निषेवणं पितृमखा हव्यागताद्यबलिः ॥
एते व्यर्थ फलाभवन्ति नियतं यस्य प्रसादं विना । तं वंदे ॥८॥

पूर्वाशाभि मुखः कृतांजलि पुटः श्लोकाष्टकं यः पटेत् ।
पौरश्चर्य विधि विनापि लभते मंत्रस्यसिद्धिंपराम् ॥
नोविघ्नैः परिभूयते प्रतिदिनं प्राप्नोति पूजाफलम् ।
देहान्ते परमं पदं निवसते यद्योगिनां दुर्लभम् ॥९॥

इति शिवम्

પ્રાક્કથન

પરમવંદનીય શ્રી સદ્ગુરુ ચરણારવિંદમાં સાષ્ટાંગ પ્રણામ સહિત વિનમ્ર પ્રાર્થના

મા ભગવતી શ્રી પરાંબિકાની કૃપાપ્રસાદી, સદ્ગુરુદેવશ્રીનાં અનન્ય આશીર્વાદ તેમજ આપ્તજનોના અસીમ સહયોગ અને સહકાર એ ત્રિવિધ શકિતના સુભગમિલનના ફલસ્વરૂપ આ લઘુ પુસ્તિકા સૌ આત્મીય ભક્ત બંધુઓના સદુપયોગાર્થે પ્રગટ થાય છે.

પરમ પૂજ્યપાદ શ્રી પરમગુરુ શ્રી સીતારામ મહારાજના વંદનીય કનિષ્ટ આત્મજ (પુત્ર) શ્રીમાન ભાઉસાહેબ નારાયણભાઈ ભટસાહેબે આ પુસ્તિકા પ્રગટ કરવા સંમતિ આપી તેમજ એની હસ્તપ્રતમાં આવશ્યક સુધારા વધારા કરી નવીન સ્વરૂપ આપવામાં જે અતિવ શ્રમ કરી ભક્તજનો અને મારા પર જે અનુપમ અનુગ્રહ કર્યો છે તે બદલ હું એમનો અત્યંત ઋણી છું. તેમજ આ કાર્યમાં પુનાના ગુરુભક્ત શ્રી યશવંત નારાયણ વૈશંપાયન એન્જીનિયર બી. ઈ. એ. એમ. આઈ. ઇ.

અને ગુરુભક્ત શ્રી નરસિંહ ચિંતામણ જોશી એન્જીનિયર બી. ઈ. એ. એમ. આઈ. ઈ. એ સંશોધન કાર્યમાં જે સહાય કરી છે એ માટે એમનો સાદર અત્યંત આભાર માનું તો તે યોગ્ય જ લેખાશે.

માએ મને તો માત્ર નિમિત્ત જ બનાવ્યો છે પરંતુ પ્રેરણા અને પરિશ્રમનાં સિંચન આત્મસ્વરૂપ શ્રી સોમનાથભાઈ નં. ભટ્ટ અને શ્રી બાલકૃષ્ણભાઇ મ. શાસ્ત્રીએ કર્યાં છે; એમનો જેટલો આભાર માનું તેટલો ઓછો જ ગણાય.

સમયસર બ્લોકો બનાવી આપવાનો શ્રમ લેનાર સ્નેહીભાઈશ્રી પ્રમોદચંદ્ર મગનલાલ ત્રિવેદી, મુદ્રણમાં શ્રી ઇન્દુભાઈ શેલત અને શ્રી સોમેશ્વરભાઇ મં. ભટ્ટે ભાવના અને લાગણીપૂર્વક શ્રમ કર્યો છે તેમને શી રીતે ભુલાય? એમનો પણ આભાર માનું છું.

શ્રી સદ્‌ગુરુકૃપાકાંક્ષી કપિલરાય ના. ઠાકુરના

સાદર પ્રણામ

વામનદ્વાદશી ૨૦૩૦ 卐 શુક્રવાર તા. ૨૭-૯-૭૪

श्री
१०
९
४
११
१
५
३
८
७
६
२
१२
१ सामान्य पात्र
२ सामान्यर्घ्यं (शंख)
३ विशेषार्घ्य
४ घंटापात्र
५ आत्मपात्र
आसन
६ गंधपात्र
७ अक्षतपात्र
८ नैवेद्यपात्र
९ तांबुल
१० दीपं
११ भूतबलिभूमौ
१२ उच्छिष्टभूतबलिभूमौ

॥ श्री गुं गुरुभ्यो नमः ॥

॥ श्री मन्महात्रिपुरसुन्दरी पूजापद्धतिः ॥

॥ श्री गणेशाय नमः ॥ श्रीशांबंदे ॥

अथ लघुत्तर श्रीपूजा पद्धत्यारंभः। नित्य क्रियां निर्वत्य। पंचतिक्तमुखः ॥ एला लवंग जातिफलत्र कंकोलकेशराणि इतिपंचतिक्तानि ॥ आचम्यादि अष्टांगतिथि चोल्लिख्य ॥ (अहर्गण) श्रीगुरुपरदेवता प्रीतिकामनया तंत्रोक्तमार्गेण यथासंभावितोपचारैः नित्य नैमित्तिक वा पूजनं करिष्ये ॥ तदंगासनविधिपूर्वकं भूशुद्धि भूतशुद्धि प्राणप्रतिष्ठांतमातृका बहिर्मातृका मूल षडंगन्यासांश्च पात्रस्थापनं चाहं करिष्ये ॥

अथ दिग्बंधनम् ॥

ॐ ऐं ह्रीं श्रीं अं आं

ब्राह्मी सहित असितांग भैरवाय लं इंद्राय वज्रहस्ताय

सांगाय सपरिवाराय सायुधाय सशक्तिकाय ऐरावतरूढाय नमः पूर्वदिशां बंधयामि स्थापयामि नमः ॥ १ ॥

(एवं सर्वत्र अक्षतैः संपूज्य)

ॐ ऐं ह्रीं श्रीं इं ईं

माहेश्वरि सहित रुरुभैरवाय रं अग्नये शक्तिहस्ताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय मेषारूढाय नमः अग्निदिशांबंधयामि स्थापयामि नमः ॥ २ ॥

ॐ ऐं ह्रीं श्रीं उं ऊं

कौमारी सहित चंडभैरवाय यं यमाय दंडहस्ताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय महिषारूढाय नमः दक्षिणदिशां बंधयामि स्थापयामि नमः ॥ ३ ॥

ॐ ऐं ह्रीं श्रीं ऋं ॠं

वैष्णवी सहित क्रोध भैरवाय क्षं नैऋत्ये खड्गहस्ताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय नरारूढाय नमः

निऋतिदिशां बंधयामि स्थापयामि नमः ॥ ४ ॥

ॐ ऐं ह्रीं श्रीं लृं लॄं

वाराही सहित उन्मत्त भैरवाय वं वरुणाय पाशहस्ताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय मकरारूढाय नमः पश्चिमदिशां बंधयामि स्थापयामि नमः ॥ ५ ॥

ॐ ऐं ह्रीं श्रीं एं ऐं

इन्द्राणीसहित कपालभैरवाय यं वायवे ध्वज हस्ताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय मृगारुढाय नमः वायुदिशां बंधयामि स्थापयामि नमः ॥ ६ ॥

ॐ ऐं ह्रीं श्रीं ओं औं

चामुंडासहित भीषण भैरवाय सं सोमाय गदाहस्ताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय अश्वारुढाय नमः

उत्तरदिशां बंधयामि स्थापयामि नमः ॥ ७ ॥

ॐ पं ह्रीं श्रीं यं आः

चंडिका सहित संहारभैरवाय हं ईशानाय त्रिशुलहस्ताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय वृषारूढाय नमः ईशानदिशां बंधयामि स्थापयामि नमः ॥ ८ ॥

ॐ पं ह्रीं श्रीं

ब्रह्मणे पद्मशक्ति सहिताय कमंडलुहस्ताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय हंसारुढाय नमः उर्ध्वदिशां बंधयामि स्थापयामि नमः ॥ ९ ॥

ॐ प ह्रीं श्रीं

अनंताय शेषशक्तिसहिताय अनंतास्त्रहस्ताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय शेषारूढायः अधोदिशां बंधयामि स्थापयामि नमः ॥ १० ॥

॥ पूर्वेशान मध्ये तिरस्करिणीं ध्यात्वा ॥

ॐ अस्यश्री तिरस्करिणी मंत्रस्य अदृश्यावर्तक ऋषये नमः

शिरसि अव्यक्त गायत्रीछंदसे नमः मुखे ॥ तिरस्करिणी देवतायै नमः हृदये ॥ श्री बीजाय नमः गुह्ये ॥ ह्रीं शक्तये नमः पादयोः ॥ ठः ठः कीलकाय नमः सर्वांगे ॥

तिरस्करिणी देवताप्रसाद सिध्यर्थे विनियोगाय नमः

॥ कृतांजलिः ॥

॥ अथ न्यासः ॥

ह्रां अंगुष्ठाभ्यां नमः ॥ ह्रीं तर्जनीभ्यां नमः ॥
ह्रू मध्यमाभ्यां नमः ॥ ह्रैं अनामिकाभ्यां नमः ॥
ह्रौं कनिष्ठकाभ्यां नमः ॥ ह्रः करतलकरपृष्ठाभ्यां नमः ॥

॥ एवं हृदयादिन्यासः ॥

ह्रां हृदयाय नमः ॥ ह्रीं शिरसे स्वाहा ॥ ह्रुं शिखायै वषट् ॥ ह्रैं कवचाय हुम् ॥ ह्रौं नेत्रत्रयाय वौषट् ॥ ह्रः अस्त्राय फट् ॥

॥ अथ ध्यानम् ॥

नीलं तुरंगमधिरुह्य पुरः प्रयान्ती
नीलांशुकाभरण माल्य विलेप नाढ्या॥
निद्रापटेन भुवनानि तिरोदधाना
खड्गायुधा भगवती परिपातु भक्तान्॥

॥ मानसैः संपूज्य ॥ मनुः ॥

ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः

ॐ नमो भगवति महामाये महानिद्रे तिरस्कारिणि
सकलपशुजन मनश्चक्षुः श्रोत्र तिरस्करणं
कुरु कुरु हुं फट् स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं ॐ॥

॥ किंचिज्जपित्वा ॥

॥ द्वारदेशे ध्यात्वा ॥ आवाहनादि सप्तमुद्राः प्रदर्श्य ॥
आवाहितोभव ॥ स्थापितोभव ॥ सन्मुखीभव॥

सन्निरोधीभव ॥ विमलीभव ॥ संकलीकरणम् ॥
अवगुंठिताभव ॥ अमृतीभव ॥ इति ॥
॥ गंधादि पंचोपचारैः संपूज्य ॥
॥ अथ द्वार पूजा ॥ द्वादश द्वार देवताभ्यो नमः ॥
॥ ॐ ऐं ह्रीं श्रीं विघ्नराजादि क्षत्रदेव्यंत ॥ इति ॥
॥ द्वारस्यऊर्ध्वशाखायाम् संपूजयेत् ॥
॥ अंतः श्वासानुसारेण वामांगं संकोच्य ॥
अपसर्पन्तु ते भूता ये भूता भूमि संस्थिताः ॥
ये भूता विघ्न कर्तारस्ते नश्यन्तु शिवाज्ञया ॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ॥
सर्वेषामविरोधेन पूजाकर्म समारभेत् ॥
॥ इति मंत्रेण पूजा गृहांतः प्रविश्य ॥
॥ आचम्य देशकालौ स्मृत्वा अद्यांगतिथि चोल्लिख्य श्रीपर
देवता प्रीत्यर्थं यथा संभावित द्रव्यैः पूजनमहं करिष्ये ॥

॥ तदंगासनविधिं करिष्ये ॥

ॐ ऐं ह्रीं श्रीं क्लीं आधारशक्ति कमलासनाय नमः॥ इत्यासनम् ॥

तीक्ष्णदंष्ट्र महाकाय कल्पांत दहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥

इति वामपाद पार्ष्णिघातेन त्रिवारं भूमिं निःसार्य भूशुद्धिं कुर्यात् ॥

उत्पतंत्विह भूतानि पृथिव्यंतर वासिनः ।
आसनादौ नमस्कृत्वा पूजाकर्म समारभेत् ॥

मूलेन त्रिः प्राणायामं कृत्वा ॥ ॐ हंसः इति हृदयं स्पृशन् ।
लं वं रं यं हं हंसः सोहं ॥
त्रिर्जपित्वा ॥ व्यापकं कृत्वा ॥ इति भूतशुद्धिः ॥

ॐ आं ह्रीं क्रों हंसः सोहं स्वाहा । मम प्राण इह प्राणाः ॥
ॐ आं ह्रीं क्रों ,, ,, ,, । मम जीव इह स्थितः ॥
ॐ ,, ,, ,, ,, ,, ,, । मम सर्वेन्द्रियाणि स्थितानि
इहागत्य सुखं चिरं तिष्ठन्तु स्वाहाः ॥

इति हृदयं स्पृष्ट्वा ॥ ॐ इति पंचदशधा जपेत् ॥ इति प्राणप्रतिष्ठा ॥

॥ अथ अंतर्मातृका ॥

ॐ हंसः सोहं अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः
कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं
धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं

॥ इति व्यापकं कुर्यात् ॥

॥ इत्यंतर्मातृका ॥

॥ अथ बहिर्मातृका ॥

ॐ	ऐं	ह्रीं श्रीं	अं	नमः ।	ॐ	ऐं	ह्रीं श्रीं	आं	नमः ।
,,	,,		इं	,,	,,	,,		ईं	,,
,,	,,		उं	,,	,,	,,		ऊं	,,
,,	,,		ऋं	,,	,,	,,		ॠं	,,
,,	,,		लृं	,,	,,	,,		लॄं	,,
,,	,,		एं	,,	,,	,,		ऐं	,,

,,	,,	ओं	,,	,,	,,	औं	,,
,,	,,	अं	,,	,,	,,	अः	,,
,,	,,	कं	,,	,,	,,	खं	,,
,,	,,	गं	,,	,,	,,	घं	,,
,,	,,	ङं	,,	,,	,,	चं	,,
,,	,,	छं	,,	,,	,,	जं	,,
,,	,,	झं	,,	,,	,,	ञं	,,
,,	,,	टं	,,	,,	,,	ठं	,,
,,	,,	डं	,,	,,	,,	ढं	,,
,,	,,	णं	,,	,,	,,	तं	,,
,,	,,	थं	,,	,,	,,	दं	,,
,,	,,	धं	,,	,,	,,	नं	,,
,,	,,	पं	,,	,,	,,	फं	,,
,,	,,	बं	,,	,,	,,	भं	,,

,,	,,	मं	,,	,,	,,	यं	,,
,,	,,	रं	,,	,,	,,	लं	,,
,,	,,	वं	,,	,,	,,	शं	,,
,,	,,	षं	,,	,,	,,	सं	,,
,,	,,	हं	,,	,,	,,	ळं	,,
,,	,,	क्षं	,,	इत्यंत व्यापकं कुर्यात् ॥			

॥ इति बहिर्मातृका ॥

॥ मूल–षडंग न्यासः ॥

ॐ ऐं ह्रीं श्रीं ऐं कएईल ह्रीं सर्वशक्तिधाम्ने अंगु० हृदयाय नमः ॥

,, ,, क्लीं हसकहल ह्रीं नित्यतृप्तिशक्तिधाम्ने तर्ज०
शिरसे स्वाहा ॥

,, ,, सौः सकल ह्रीं अनादिबोधशक्तिधाम्ने मध्य०
शिखायै वषट् ॥

,, ,, ऐं कएईल ह्रीं स्वतंत्रशक्तिधाम्ने अना० कवचायहुं ॥

,, ,, क्लीं हसकल ह्रीं नित्य मलुप्तशक्तिधाम्ने कनि० नेत्र० वौषट् ॥

,, ,, सौः सकल ह्रीं अनंतात्मशक्तिधाम्ने करतल० अस्त्राय० फट् ॥

॥ इति मूलषडंगन्यासाः ॥

॥ ॐ श्रीं ह्रीं क्लीं सौः हसौंः स्हौंः हंसः सोहं ह्रीं श्रीं ॐ अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अंः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं ॐ श्रीं ह्रीं हंसः सोहं स्हौंः हस्रौंः स्रौः क्लीं ह्रीं श्रीं ॐ ॥

॥ इति जपन् दशवारं व्यापकं कुर्यात् ॥

|| स्वशिरसि गुरुपादुकां दीपिनीं स्मरन् ||

ॐ श्रीं ह्रीं क्लीं ऐं वद वद वाग्वादिनि क्लीं क्लिन्ने क्लेदिनि क्लेदय ।
महाक्षोभं कुरु कुरु क्लीं सौः मोक्षं कुरु कुरु ह्स्रौः स्हौः स्वाहा ॥

। किंचिन् महागणपति मूलविद्यां च जपेत् ।

ताम्रपात्रे गंधाक्षत पुष्पजलं गृहीत्वा ॥

ॐ ऐं ह्रीं श्रीं ॐ ह्रां ह्रीं सः मार्तंडभैरवाय प्रकाशरश्मिशक्ति
सहिताय एषोऽर्घ्यः स्वाहा ॥

|| इति अर्घ्यं दद्यात् ||

|| अथ सामान्योदक पात्र स्थापनम् ||

स्ववामभागे, देव्यग्रादि त्रिकोणं वृत्तं
चतुरस्रं मंडलं कृत्वा ॥

ॐ ऐं ह्रां श्रीं मं मंडलाय नमः ॥

४ हृदयदेव्यै नमः ॥ ४ शिरो देव्यै नमः ॥
४ शिखा देव्यै नमः ॥ ४ कवच देव्यै नमः ॥
४ नेत्र देव्यै नमः ॥ ४ अस्त्र देव्यै नमः ॥

[illegible]स्य अग्नि ईशान निऋति वायव्यंत मध्ये च पूर्वादिक्रमेण
वामावर्तेन चतुर्दिक्ष्वन्तं षडंगं पूजयेत् ॥

॥ तदुपरि साधारं शुद्धपात्रं शुद्धजलं गंधमिश्रितं ॥

॥ ॐ नमः ऐं ह्रीं श्रीं इति संस्थाप्य ॥

ब्रह्माण्डोदर तीर्थानि करैः स्पृष्टानि ते रवे ।
तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥

ॐ क्रों अंकुशमुद्रया सूर्यमंडलात् तीर्थानि आकृष्य ॥

गंगे च यमुने चैव गोदावरी सरस्वति ।
नर्मदे सिंधु कावेरि जलेस्मिन् सन्निधिं कुरु ॥

ॐ नमो भगवति अशेष तीर्थालवाले ह्रीं श्रीं ।
शिव जटाजूटाधिरूढे । गंगे गंगाम्बिके स्वाहा ॥

॥ इति अभिमंत्र्य ॥

४ गं तार्क्ष्य मुद्रया निर्विषीकृत्य । ४ फट् अस्त्र मुद्रया संरक्ष्य ।
४ हुं कवचेन अवगुंठ्य । ४ वं धेनु मुद्रया अमृती कृत्य ।
मूलेन त्रिवारमभिमंत्र्य । गंधाक्षतैः संपूज्य ॥

॥ इति सामान्योदकपात्रम् ॥

॥ अथ सामान्यार्घ्यम् ॥

पूर्ववत् त्रिकोणं, वृत्तं चतुरस्रं मंडलं कृत्वा ॥
अग्नीशानासुरवायव्यंतमध्ये पूर्वादिक्रमेण
वामावर्तेन च चतुर्दिक्ष्वंतं षडंगसंपूज्य ॥
ॐ ए ह्रीं श्रीं मं मंडलाय नमः ॥ ४ हृदय
देव्यै नमः ॥ ४ शिरो देव्यै नमः ॥ शिखा
देव्यै नमः ॥ ४ कवच देव्यै नमः ॥ ४ नेत्र देव्यै नमः ॥
४ अस्त्र देव्यै नमः ॥

॥ इति अक्षतैः संपूज्य ॥

ॐ ऐं ह्रीं श्रीं अं ऐं अग्नि मंडलाय धर्मप्रद दशकलात्मने सामान्यार्घ्याधाराय नमः ॥ इति अग्निकलावदाधारं विभाव-यित्वा त्रिपाद्याधारं संस्थाप्य ॥

ॐ ऐं ह्रीं श्रीं उं क्रौं सूर्यमंडलाय अर्थप्रद द्वादशकलात्मने सामान्यार्घ्यपात्राय नमः ॥ इति सूर्यकलावत् पात्रं विभाव्य फट् इति प्रक्षालन पूर्वकं शंखं संस्थाप्य ॥

॥ देवता वामभागे सूर्यकलात्मकं शंखं ध्यात्वा ॥

ॐ ऐं ह्रीं श्रीं मं सौः सोममंडलाय कामप्रद षोडश कलात्मने सामान्यार्घ्यामृताय नमः इति सामान्योदकेनापूर्य ॥

॥ शंखमुद्रां प्रदर्श्य ॥

पूर्ववत् तार्क्ष्य अस्त्र, अवगुंठन धेनु मुद्राः प्रदर्श्य ॥ यथा ४ गं तार्क्ष्य मुद्रया निर्विषीकृत्य । ४ फट् अस्त्रमुद्रया संरक्ष्य । ४ हुं कवचेना अवगुंठ्य । ४ वं धेनुमुद्रया अमृतीकृत्य । मूलेन त्रिवारं अभिमंत्र्य । गंधाक्षत पुष्पैः संपूज्य ।

॥ इति सामान्यार्घ्यम् ॥

॥ अथ विशेषार्घ्यम् ॥

॥ पूर्ववत् मंडलाद्येन पूजां कृत्वा ॥

त्रिकोणं वृत्तं चतुरस्रं मंडलं कृत्वा ॥
अग्नीशानासुरवायव्यंतमध्ये पूर्वादिक्रमेणच
वामावर्तेन चतुर्दिक्ष्वंतंषडंगं संपूज्य ॥
ॐ ऐं ह्रीं श्रीं मं मंडलाय नमः ॥ ४ हृदयदेव्यै
नमः ॥ ४ शिरोदेव्यै नमः ॥ ४शिखा देव्यै नमः ॥
४ कवच देव्यै नमः ॥ ४ नेत्रदेव्यै नमः ॥ ४ अस्त्रदेव्यै नमः ॥
ॐ ऐं ह्रीं श्रीं अं ऐं अग्निमंडलाय धर्मप्रद दशकलात्मने
विशेष पात्राधाराय नमः ॥
॥इत्याग्निकलावदाधारं विभाव्य आधारपात्रं संस्थाप्य
तदुपरि सुधुपितं सूर्यकलात्मकं पात्रं विभाव्य ॥
ॐ ऐं ह्रीं श्रीं उं क्रीं सूर्यमंडलाय अर्थप्रद द्वादशकलात्मने
विशेषपात्राय नमः ॥ इति पात्रंसंस्थाप्य ॥

क्ष ऐं ह्रीं श्रीं मं सोः सोममंडलाय कामप्रद षोडशकलात्मने विशेष पात्रामृताय नमः॥ मूलेन पात्रं अमृतेन पूरयित्वा॥

तन्मध्ये वामावर्तेन अकथादि रेखात्रयं त्रिकोणं विभाव्य। अं आ......अः कं॥ खं गं......तं॥ थं दं... ..सं॥ त्रिकोणेषु हं ळं क्ष इतिक्रमेण देव्यग्रादि त्रिकोणं कुर्यात्॥

उपरि षट्कोणं वृत्तं अष्ट पद्मं चतुरस्रंविलिख्य विभाव्य तन्मध्ये हंसः इति विलिख्य॥

ॐ ऐं ह्रीं श्रीं ह् स् ख् फ्रें हसक्षमलवरय ऊं आनंदभैरवाय वौषट्

आनंदभैरव श्रीपादुकां पूजयामि ॥

ॐ ,, ,, सहक्षमलवरयइं सुधादेव्यै वौषट्

आनंद भैरवी श्री पादुकां पूजयामि ॥

॥ त्रिकोणेषु ॥

ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः कामेश्वरी वज्रेश्वरी भगमालिनी

श्री महात्रिपुरसुंदरी श्री पादुकां पूजयामि ॥

॥ मध्ये ४ मूलं श्री पादुकां पूजयामि ॥

॥ इति संपूज्य ॥

॥ षट्कोणेषु बालायाः षडंगं संपूज्य ॥

॥ अष्टदलेषु ब्राह्म्याद्यसितांगभैरवं पूजयेत् ॥

ॐ ऐं ह्रीं श्रीं बालाषडंग देवता श्री पादुकां पूजयामि ॥

,, ,, ब्राह्म्याद्यसितांगाष्टभैरव श्री पादुकां पूजयामि ॥

„ „ ग्लूं स्लूं म्लूं प्लूं न्लूं पंचरत्नेश्वरी
श्री पादुकां पूजयामि ॥
„ „ अग्नि सूर्यसोमाष्टत्रिंशत कलाश्री पादुकां पूजयामि ॥
॥ ॐ ऐं ह्रीं श्रीं अं ब्रह्म दशकला श्री पादुकां पूजयामि ॥
ॐ हंसः शुचि षद्वसुरंतरिक्ष सद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसत्
अब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥
ॐ ब्रह्मजज्ञानं प्रथमं पुरस्तात् द्विसीमतः सुरुचोवेन आवः ।
सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनि मसतश्च विवः ॥
नमः श्री पा० पू० ॥१॥
ॐ ऐं ह्रीं श्रीं उं विष्णु दशकला श्री पादुकां पूजयामि ॥
ॐ प्रतद्विष्णुस्तवते वीर्येण मृगोनभीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ती भुवनानि विश्वा ॥
नमः श्री पा० पू० ॥२॥
ॐ ऐं ह्रीं श्रीं मं रूद्र दशकला श्री पादुकां पूजयामि ॥

ॐ त्र्यंबकं यजामहे सुगंधि पुष्टिवर्धनं । उर्वारुकमिवबंधनान् ।
मृत्योर्मुक्षीय माऽमृतात् ॥

नमः श्री पा. पू ॥ ३ ॥

ॐ ऐं ह्रीं श्रीं विद्वीश्वर पंचकलाः श्री पादुकांपूजयामि ।
ॐ तद्विष्णोः परमं पदं सदा पश्यंति
सूरयः दिवीव चक्षुराततम् ॥
तद्विप्रासोविपन्यवो जागृवांसः समिंधते ।
विष्णोर्यत्परमंपदम् ॥

नमः श्री पा पू ॥ ४ ॥

ॐ ऐं ह्रीं श्रीं विद्वनाद सदाशिव षोडशकला
श्री पादुकां पूजयामि ॥
ॐ विष्णुर्योनिं कल्पयतु त्वष्टारूपाणि पिंशतु ।
आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते ॥ (ऋक्)

मधुवाता ऋतायते मधुक्षरतिसिंधवः
माध्वीर्नः संत्वोषधीः ॥ (ऋक्)

नमः श्री पा. पू. ॥ ४ ॥

ॐ ऐं ह्रीं श्रीं ॐ नमो भगवति वारुणि जलमूर्तये
ग्रामेश्वरि । पथिकदेवते गृह्ण गृह्ण ॥
श्रीं क्लां ब्रां क्रां सर्वदोषान् मोचय मोचय ॥
शुक्रेंद्र-ब्रह्म कृष्ण सर्वशापान् मोचय मोचय ॥
ॐ ऐं ह्रीं श्रीं शां शीं शूं शैं शौं शः शुक्रादि चतुः शापान्
मोचय मोचय स्वाहा ॥

॥ इति सकृत जपित्वा ॥

॥ ॐ आं ह्रीं क्रों हंसः सोहं स्वाहा ॥
समस्तकला सहित सुधादेव्या प्राण इह प्राणाः ॥
ॐ आं ह्रीं क्रों हंसः सोहं स्वाहा ॥
समस्तकला सहित सुधादेव्या जीव इह स्थितः ॥

ॐ आं ह्रीं क्रों हसः सोहं स्वाहा समस्तकला सहिता सुधादेव्या सर्वेन्द्रियाणि स्थितानि। इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥

॥ ॐ इति पंचदशधाजपेत् ॥

४ हसौ अं आं... इं ईं.. अं अः... कं खं गं.. हं ळं क्षं हसौः

ॐ ऐं ह्रीं श्रीं ऐं क्लीं हस्त्रौं जूं सः अमृते अमृतोद्भवे अमृतेश्वरि अमृत वर्षिणि अमृतं स्रावय स्रावय स्वाहा ॥ इति सकृत् ॥

ॐ श्रीं ह्रीं क्लीं ऐं वद वद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरु कुरु क्लीं सौः मोक्षं कुरु कुरु ः हसौः स्हौः स्वाहा ॥

श्रीं ह्रीं क्लीं ॐ नमो भगवति माहेश्वरि अन्नपूर्णे ममाभिलषितमन्नं देहि ठः ठः स्वाहा ॥ इति सकृत् ॥

ॐ ऐं ह्रीं श्रीं गं तार्क्ष्यमुद्रयानिर्विषीकृत्य

ॐ ऐं ह्रीं श्रीं फट् अस्त्रमुद्रयासंरक्ष्य। ॐ ऐं ह्रीं श्रीं हुं कवचेना अवगुंठ्य। ४ वं धेनु मुद्रया अमृतीकृत्य॥ मूलमंत्रेण दशधा-ऽभिमन्त्र्य॥ गंधाक्षतपुष्पैः संपूज्य॥

॥ इति विशेषार्घ्यपात्रार्चनम् ॥

श्रीपात्रीयं बिंदुं सामान्यार्घ्यं (सामान्योदकपात्रेच) निक्षिपेत् ॥
अस्टम्यां खड्गादिशस्त्रान् गंधाक्षतपुष्पविद्धंकितं कुर्यात् ॥

॥ अथ घंटापात्रस्थापनम् ॥

त्रिकोणं वृत्त चतुरस्रं मंडलंकृत्वा ॥

ॐ ऐं ह्रीं श्रीं संमंडलाय नमः । ॐ ऐं ह्रीं श्रीं हृदयदेव्यै नमः ।
ॐ ऐं ह्रीं श्रीं शिरोदेव्यै नमः । ॐ ऐं ह्रीं श्रीं शिखादेव्यै नमः ।
ॐ ऐं ह्रीं श्रीं कवचदेव्यै नमः । ॐ ऐं ह्रीं श्रीं नेत्रदेव्यै नमः ।
ॐ ऐं ह्रीं श्रीं अस्त्रदेव्यै नमः ॥

॥ पूर्ववत् सपूज्य ॥

ॐ ऐं ह्रीं श्रीं अं ऐं अग्निमंडलाय धर्मप्रद दशकलात्मने श्रीघंटा-
पात्राधाराय नमः । इतिअग्निकलावत् विभावयित्वा ॥

त्रिपद्याधारं संस्थाप्य ॥

ॐ ऐं ह्रीं श्रीं उं क्लीं सूर्यमंडलाय अर्थप्रद द्वादशकलात्मने
श्री घंटापात्रायनमः । इति घंटां संस्थाप्य ॥

ॐ ऐं ह्रीं श्रीं जगद्ध्वनि मंत्रमातः स्वाहा इति घंटां संपूज्य ॥

अपवित्रः पवित्रोवा सर्वावस्थां गतोऽपिवा ।
यः स्मरेद्देवमीशानं स बाह्याभ्यंतरः शुचिः ॥

॥ इति सामान्योदकेन पूजाद्रव्यमात्मानं च संप्रोक्ष्य ॥
॥ पूजासामग्रीं स्वदक्षिणभागे संस्थाप्य ॥

॥ अथ आत्मपूजा ॥

॥ आत्मानं गंधादिनालंकृत्य ॥ स्वशिरसि संघट्ट मुद्रां बध्वा ॥
॥ गुरुपादुकां जप्त्वा ॥ गुरुदेवता मंत्रैक्यं भावयेत् ॥

॥ अथ आत्मपात्रस्थापनम् ॥

स्वाग्रादि-त्रिकोणं वृत्तं चतुरस्रं मंडलं कृत्वा अग्नीशाना सुरवायव्यंत मध्ये पूर्वादिक्रमेण, वामावर्तेन च चतुर्दिक्ष्वंतंषडंगं संपूज्य ॥ ॐ ऐं ह्रीं श्रीं मं मंडलाय नमः ४ हृदय-देव्यै नमः ॥ ४ शिरो देव्यै नमः ॥ ४ शिखा-

देव्य नमः ॥ ४ कवच देव्यै नमः ॥ ४ नेत्र देव्यै नमः ॥ ४ अस्त्र-
देव्यै नमः ॥

॥ इति मंडलमक्षतैः संपूज्य ॥

ॐ ऐं ह्रीं श्रीं अं ऐं अग्निमंडलाय धर्मप्रददशकलात्मने
आत्मपात्राधाराय नमः ॥ इति अग्निकलावत् आधारं-
त्रिपद्याधारा विभावयित्वा संस्थाप्य ॥

ॐ ऐं ह्रीं श्रीं उं क्लीं सूर्यमंडलाय अर्थप्रद द्वादश कलात्मने
आत्मपात्राय नमः ॥इति सूर्यकलावत्पात्रं विभाव्य ॥ पात्रं
संस्थाप्य ॥

ॐ ऐं ह्रीं श्रीं मं सौः सोम मंडलाय कामप्रद षोडशकलात्मने
आत्मपात्रामृताय नमः ॥

मूलेनपात्रं पूरयित्वा ॥ तन्मध्ये श्रो पात्रीयं बिंदु निक्षिप्य ॥
॥ स्वशिरसि ओघत्रयेण गुरुमंडलं पूजयेत तर्पयेच्च ॥ यथा ॥
॥ ॐ ऐं ह्रीं श्रीं नारायणादि सप्त दिव्यौघेभ्यः परमेष्टि गुर्वादि

पराख्य गुरुभ्यो नमः श्री पादुकां पूजयामि तर्पयामि ॥

॥ ४ ॥ गौडपादाचार्यादि त्र्यसिद्धौघेभ्यः परम गुर्वादि पराख्य गुरुभ्योनमः श्री पा. पू. त. ॥

॥ ४ ॥ विश्वरूपाचार्यादि चतुर्मानवौघेभ्यः स्वगुर्वादि पराख्य गुरुभ्यो नमः श्री पा. पू. त. ॥

॥ तदनंतर गुरुत्रय मंत्रेण स्वशिरस्सिपूजयेत तर्पयेच्च ॥

॥ श्रीविद्यादि सकल देवताः हृदयोपरि संतर्प्य ॥

॥ मूलाधारे गणपतिं संतर्प्य ॥ नाभिस्थाने स्वपादुकां संतर्प्य ॥

॥ स्वपादुकामंत्रः ॥

ॐ ह्रीं हंसःसोहंस्वाहा अमुकानंदनाथ अमुकांबा श्रीपादुकां पूजयामि तर्पयामि ॥

॥ इत्यष्टाक्षरं मनुं नाभौ संतर्प्य ॥

॥ मूलाधारात् कुंडलिनीमुत्थाप्य ॥ तन्मध्ये कालाग्निमेव कामाग्नि

वासनात्मकेन्धनं प्रज्वलितं प्राणादि पंचवायुभिः संधुक्षितं
कुंडलिनीरूपं श्रीपरदेवताधिष्ठितं चिदग्निमंडलं विभाव्य
मूलविद्यान्ते ॥

॥ धर्माधर्महविर्दीप्तावात्माग्नौ मनसा स्रुचा सुषुम्णा वर्त्मना
नित्यमक्षवृत्ति जुहोम्यहम् ॥

॥ पुण्यपाप-कृत्याकृत्य-संकल्पविकल्प धर्माधर्मात्मकं हविः ॥

॥ अष्टपाशात्मकं वन्हौ हुत्वा ॥

॥ ततो निर्विकल्पं स्वतेजोमयं विचिंत्य ॥

॥ प्रकाश विमर्श हस्ताभ्यामवलंब्यो मनीषिचं धर्माधर्म कलास्नेहं
॥ पूर्णमग्नौ जुहोम्यहम् ॥ धर्माधर्म-कृत्याकृत्य-संकल्प विकल्प-
पापपुण्यं जुहोमि स्वाहा ॥ कुंडलिनीमुखे स्वपात्रं हुवेदिति ॥
॥ ततो निर्विकल्पं स्वतेजोमयं आत्मानं विचिंत्य पूजामारभेत् ॥

॥ अथ पीठादिपूजा ॥

ॐ ऐं ह्रीं श्रीं मं मंडूकादि नव पीठेभ्यो नमः ॥

ॐ ऐं ह्रीं श्रीं इक्ष्वादि चतुः समुद्रेभ्यो नमः ॥

„ „ पुष्परागादि नवरत्नेभ्यो नमः ॥

॥ उपरि ॥

„ „ सुवर्ण पर्वतादि सप्तवाटिकाभ्यो नमः ॥

„ „ मूलं श्री मन्महात्रिपुरसुंदरी देवतायै नमः ॥

॥ उपरि ॥

„ „ कालचक्रेश्वर्यादि नवचक्रेश्वरीभ्यो नमः ॥

„ „ करुणतोयाद्यैकादशरत्न सिंहासनेभ्यो नमः ॥

„ „ पंच ब्रह्मासनाय नमः ॥

„ „ धर्मज्ञानवैराग्यैश्वर्येभ्यो नमः ॥

„ „ अधर्मादि अनैश्वर्येभ्यो नमः ॥

„ „ मायादि पंचाशद् वर्णाढ्यतत्वकर्णिकायै नमः ॥

„ „ मूलं श्री मन्महात्रिपुरसुंदरि देवतायै नमः ॥

„ „ सूर्य सोमाग्नि मंडलेभ्यो नमः ॥

ॐ प ह्रीं श्रीं सत्वरजतमगुणेभ्यो नमः ॥
„ „ आत्मांतरात्मा परमात्मभ्यो नमः ॥
„ „ ज्ञानतत्वादि परतत्वेभ्यो नमः ॥
„ „ मोहिनी क्षोभिणी वंशिनी स्तंभिन्याकर्षिणी
द्राविण्याल्हादिनी क्लिन्नाक्लेदिनी अष्टक्रीं
„ „ सर्वतत्व कमलासनाय नमः ॥

॥ इति पीठादिपूजा ॥

॥ ततः त्रिखंडा मुद्रया (विततांगुष्टयोनिमुद्रया) पुष्पांजलिं गृहीत्वा ।

॥ अथ ध्यानम् ॥

चतुर्भुजे चंद्रकला वतंसे कुचोन्नते कुंकुमरागशोणे ॥
पुंड्रेक्षुपाशांकुश पुष्पबाण हस्ते नमस्ते जगदेकमातः ॥ १ ॥
कुंकुमपंकसमाभामंकुशपाशेक्षुचाप कुसुमशराम् ।
पंकज मध्यनिषण्णां पंकेरुह लोचनां परां वंदे ॥ २ ॥

सकुंकुम विलेपना मलकचुंबि कस्तूरिकां
समंदहसितेक्षणां सशरचाप पाशांकुशाम् ।
अशेषजनमोहिनी मरुणमाल्यभूषांबराम्
जपाकुसुमभासुरां जपविधौ स्मरेदंबिकाम् ॥ ३ ॥

भूवेस्मत्रिवृत षोडश नाग शक्र
दिग्युग्मस्वनलकोणकबिंदुमध्ये ।
सिंहासनो परिगतां वरपीठमध्ये
प्रोत्फुल्ल पद्मनयनां त्रिपुरां भजेऽहम् ॥ ४ ॥

सिद्धि सिंधुतर रत्न भूमिके कल्पवृक्षवनवाटि संवृत्ते ।
रत्नसानुवलयैर्निषेवते तत्रवापिशतकेन संकुले ॥
नीपवाटिमणिमंडपस्थिते चण्डभानु शतकोटिभासुरे ।
खादिपंचशिवमंचके शिवे शंकरांकमणि पीठिकातटे ॥
कादि हादि मनुरूपिणीं शिवां भावयामि परदेवतां हृदि ॥

॥ इति ॥

ॐ प ह्रीं श्रीं सत्वरजतमगुणेभ्यो नमः ॥
,, ,, आत्मांतरात्मा परमात्मभ्यो नमः ॥
,, ,, ज्ञानतत्वादि परतत्वेभ्यो नमः ॥
,, ,, मोहिनी क्षोभिणी वाशिनी स्तंभिन्याकर्षिणी
द्राविण्याल्हादिनी क्लिन्नाक्लेदिनी अष्टक्रीं
,, ,, सर्वतत्व कमलासनाय नमः ॥

॥ इति पीठादिपूजा ॥

॥ ततः त्रिखंडा मुद्रया (विततांगुष्टयोनिमुद्रया) पुष्पांजलिं
गृहीत्वा ।

॥ अथ ध्यानम् ॥

चतुर्भुजे चंद्रकला वतंसे कुचोन्नते कुंकुमरागशोणे ॥
पुंड्रेक्षुपाशांकुश पुष्पबाण हस्ते नमस्ते जगदेकमातः ॥ १ ॥
कुंकुमपंकसमाभामंकुशपाशेक्षुचाप कुसुमशराम् ।
पंकज मध्यनिषण्णां पंकेरुह लोचनां परां वंदे ॥ २ ॥

सकुंकुम विलेपना मलकचुंबि कस्तूरिकां
समंदहसितेक्षणां सशरचाप पाशांकुशाम् ।
अशेषजनमोहिनी मरुणमाल्यभूषांबराम्
जपाकुसुमभासुरां जपविधौ स्मरेदंबिकाम् ॥ ३ ॥

भूचेश्मत्रिवृत षोडश नाग शक्र
द्विग्युग्मस्वनलकोणकबिंदुमध्ये ।
सिंहासनो परिगतां वरपीठमध्ये
प्रोत्फुल्ल पद्मनयनां त्रिपुरां भजेऽहम् ॥ ४ ॥

सिद्ध सिद्धनर रत्न भूमिके कल्पवृक्षवनवाटि संवृत्ते ।
रत्नसानुवलयैर्निषेवते तत्रवापिशतकेन संकुले ॥
नीपवाटिमणिमंडपस्थिते चण्डभानु शतकोटिभासुरे ।
सादिपंचशिवमंचके शिवे शंकरांकमणि पीठिकातटे ॥
कादि हादि मनुरूपिणीं शिवां भावयामि परदेवतां हृदि ॥

॥ इति ॥

॥ स्वतेजोमय ब्रह्मरंध्रस्थ चंद्रमडले पंचब्रह्ममय मंचके पर
शिवांकस्योपरि श्री कामेश्वरीं ध्यात्वा ॥

॥ ॐ ऐं ह्रीं श्रीं ह्स्रैं ह्स्क्लीं ह्स्रौः सौः महापद्मवनान्तस्थे कारणानंद
विग्रहे। सर्वभूतहिते मातरेह्येहि परमेश्वरि। एह्येहि देव-
देवेशि त्रिपुरे भक्त वत्सले। यावत्वां पूजयिष्यामि

तावत् त्वं सुस्थिराभव ॥

॥ इति वाम नासापुटेन मूलाधारात् कुंडलिनी रूप तेजोमयं
अंजलीस्थ पुष्पेषु आदाय तत्तेजः श्री यंत्रस्थ बिंदौ विभावयन् ॥
ॐ ऐं ह्रीं श्रीं सकलह्रीं इति मंत्रेण आवाहनादि सप्त मुद्राः

प्रदर्श्य ॥

॥ १ आवाहिताभव। २ स्थापिताभव। ३ सन्मुखीभव। ४
सन्निरोधीभव। ५ विमलीभव। ६ अवगुंठिताभव ७ अमृतीभव ॥

ॐ ऐं ह्रीं श्रीं हसौः अं आं इं ई...कं खं...पं हं ळं क्षं ह सौः ॥
इतिजपन् शंखोदकेन देवतां त्रिः प्रोक्ष्य ॥ प्राणप्रतिष्ठां कुर्यात् ॥

॥ ॐ आं ह्रीं क्रों हंसः सोऽहंस्वाहा
श्री चक्रस्य प्राण इह प्राणाः ॥
ॐ आं ह्रीं क्रों हंसः सोऽहं स्वाहा
श्री चक्रस्य जीव इह स्थितः ॥
ॐ आं ह्रीं क्रों हंसः सोऽहं स्वाहा

श्री चक्रस्य सर्वेन्द्रियाणि स्थितानि ॥ इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ गर्भाधानादि पंचदश संस्कार सिध्यर्थं
पंचदश प्रणवावृति कृत्वा ॥

ॐ ऐं ह्रीं श्रीं मूलेन देवीं विशेषार्घ्यं बिंदुभिः त्रिः प्रोक्ष्य ॥

॥ संजीवनी विद्या ॥

॥ ॐ श्रीं ह्रीं क्लीं हं गणप कालिके सौः सकल ह्रीं क्लीं ब्लीं ह्रीं श्रीं ॥

॥ इति संजीवनीविद्यया देवता हृदि स्पृशन् ॥

ॐ ऐं ह्रीं श्रीं द्रां संक्षोभिणी। ॐ ऐं ह्रीं श्रीं द्रीं सर्वविद्राविणी।
,, ,, क्लीं सर्वाकर्षिणी। ,, ,, ब्लूं सर्ववशंकरी।
,, ,, सः सर्वोन्मादिनी। ,, ,, क्रों सर्वमहांकुशे।
ॐ ऐं ह्रीं श्रीं ह्स्क्फ्रें सर्वखेचरी। ॐ ऐं ह्रीं श्रीं ह्सौः सर्ववीजे।
,, ,, ऐं सर्वयोनि। ,, ,, आं पाश।
,, ,, क्रों अंकुश। ,, ,, धनुः।
ॐ ऐं ह्रीं श्रीं यां रां लां वां शां शराः ॥

॥ इति त्रयोदश मुद्राः प्रदर्श्य ॥

॥ मूलेनासनादि नीराजनांतं कल्पयित्वा इत्यस्याभिप्रायः ॥
॥ कल्पनयैव कर्तव्यं पुनः कार्यमिति कृत्वा ॥
॥ ॐ ऐं ह्रीं श्रीं मूलं श्री मन्महात्रिपुरसुंदरिदेवतायै नमः आसनं परिकल्पयामि इत्यादि पाद्यं अर्घ्यं, आचमनीयं, स्नानं, वस्त्रं, उपवस्त्रं, चंदन, अलंकारान् सौभाग्यद्रव्यं, गंधं.

पुष्पं, धुपं, दीपं, नैवेद्यं, उत्तरपोषन; हस्तप्रक्षालनं, मुखप्रक्षालनं, गंडुषं, पाद्यं अर्घ्यं आचमनीय, फलं, तांबुलं, सौगंधिकद्रव्यं नीरांजनम् ॥ इतिसंतर्पयेत्

॥ ततः ॥

श्री गुरो दक्षिणामूर्ते भक्तानुग्रहकारक ।
अनुज्ञां देहि भगवन् परिवारार्चनायमे ॥

॥ इति प्रार्थ्य । मूलेन श्री बिंदो त्रिः संतर्प्य । षडंगदेवता पूजयेत् ॥

॥ यथा ॥

ॐ ऐं ह्रीं श्रीं ऐं प्रथमकूट सर्वज्ञा हृदयशक्ति
श्रीपादुकां पूजयामि तर्पयामि ।
„ „ क्लीं द्वितीयकूट नित्यतृप्तिशिरोशक्ति
श्रीपादुकां पूजयामि तर्पयामि ।
„ „ सौः तृतीयकूट अनादिबोधशिखाशक्ति
श्रीपादुकां पूजयामि तर्पयामि ।

,, ,, ऐं प्रथमकूट स्वतंत्र कवचशक्ति
श्रीपादुकां पूजयामि तर्पयामि।
,, ,, क्लीं द्वितीयकूट नित्यमलुप्तनेत्रशक्ति
श्रीपादुकां पूजयामि तर्पयामि।
,, ,, सौः तृतीयकूट अनंतास्त्रशक्ति
श्रीपादुकां पूजयामि तर्पयामि।

॥ मूलेन देवीं त्रिः संतर्प्य ॥

॥ त्रिकोण वामावर्तमारभ्य पंचदशनित्याक्रमेण नित्याः पूजयेत् ॥

॥ अथ अहर्गणस्य तत्तदिननित्यामारभ्यपूजयेत् ॥

ॐ ऐं ह्रीं श्रीं अं कामेश्वरी नित्या श्री पादुकां पूजयामि तर्पयामि॥

,, ,, आं भगमालिनी ,, ,, ,, ,, ॥

,, ,, इं नित्यक्लिन्ना ,, ,, ,, ,, ॥

,, ,, ईं भेरुंडा ,, ,, ,, ,, ॥

ॐ ऐं ह्रीं श्रीं उं वह्निवासिनी ,, ,, ,, ,, ॥

,, ,, ऊं महावज्रेश्वरी ,, ,, ,, ,, ॥

,, ,, ऋं शिवदूती ,, ,, ,, ,, ॥

,, ,, ॠं त्वरिता ,, ,, ,, ,, ॥

,, ,, ऌं कुलसुंदरी ,, ,, ,, ,, ॥

,, ,, ॡं नित्या ,, ,, ,, ,, ॥

,, ,, एं नीलपताका ,, ,, ,, ,, ॥

,, ,, ऐं विजया ,, ,, ,, ,, ॥

,, ,, ओं सर्वमंगला ,, ,, ,, ,, ॥

,, ,, औं ज्वालामालिनी ,, ,, ,, ,, ॥

,, ,, अं चित्रानित्याश्री ,, ,, ,, ,, ॥

,, ,, अः महानित्या नित्याश्री ,, ,, ,, ॥

,, ,, मूलेन देवीं त्रि संतर्प्य ॥

॥ ४ ॥ नारायणादि सप्तदिव्यौघेभ्यः परमेष्ठी गुर्वादि
पराख्य गुरुभ्योनमः । श्री पादुकां पूजयामि तर्पयामि ॥

॥ ४ ॥ गौडपादाचार्यादित्रयं सिद्धौघेभ्यः परमगुर्वादि
पराख्य गुरुभ्यो नमः श्री पादुकां पूजयामि तर्पयामि ॥

॥ ४ ॥ विश्वरूपाचार्यादि चतुर्मानवौघेभ्यः स्वगुर्वादि
पराख्यगुरुभ्यो नमः ॥ श्री पादुकां पूजयामि तर्पयामि ॥

॥ ॐ ऐं ह्रीं श्रीं श्री निर्वाण पादुकादि स्वगुरुपादुकांत
पूजयेत् तर्पयेत् ॥

॥ ४ ॥ समस्त प्रकट गुप्त गुप्ततर संप्रदाय कुल कौल निगर्भ
रहस्याति रहस्य परापर रहस्य योगिनी
श्री मन्महात्रिपुरसुंदरी श्रीं पादुकां पूजयामि तर्पयामि ॥

॥ मूलेन देवीं त्रिः संतर्प्य ॥

॥ चतुर्द्वार भूगृहे ॥

ॐ ऐं ह्रीं श्रीं अं आं सौः त्रैलोक्य मोहनचक्रस्वामिनी अणिमादि अष्टाविंशति शक्ति सहित प्रकट योगिनी त्रिपुरा चक्रेश्वरी श्री पादुकां पूजयामि तर्पयामि ॥

॥ षोडश दले ॥

ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः सर्वाशा परिपूरक चक्रस्वामिनी कामाकर्षिण्यादि षोडशशक्ति सहित गुप्तयोगिनी त्रिपुरेशी चक्रेश्वरी श्री पादुकां पूजयामि तर्पयामि ॥

॥ अष्ट दले ॥

ॐ ऐं ह्रीं श्रीं ह्रीं क्लीं सौः सर्वसंक्षोभण चक्रस्वामिन्येनंग कुसुमाद्यष्टशक्तिसहित गुप्ततरयोगिनी त्रिपुरसुन्दरी चक्रेश्वरी श्री पा. पू. त. ॥

|| चतुर्दशारे ||

ॐ ऐं ह्रीं श्रीं ह्क्लीं ह्सौः सर्व साभाग्य दायक चक्रस्वामिनी सर्वसंक्षोभिण्यादि चतुर्दशशक्ति सहित संप्रदाय योगिनी त्रिपुरवासिनी चक्रेश्वरी श्री पा. पु. त.॥

|| बहिर्दशारे ||

ॐ ऐं ह्रीं श्रीं ह्सैं ह्स्क्लीं ह्स्सौः सर्वार्थसाधक चक्रस्वामिनी सर्वसिद्धिप्रदादि दशशक्ति सहित कुलोत्तीर्ण योगिनी-त्रिपुरा श्री चक्रेश्वरी श्री पादुकां पू. त.॥

|| अंतर्दशारे ||

ॐ ऐं ह्रीं श्रीं ह्रीं क्लीं ब्लें सर्वरक्षाकर चक्रस्वामिनी सर्वज्ञादि दशशक्ति सहित निगर्भयोगिनी त्रिपुरमालिनी चक्रेश्वरी श्री पा पू त.॥

|| अष्टारे ||

ॐ ऐं ह्रीं श्रीं ह्रीं श्रीं सौः सर्वरोगहर चक्रस्वामिनी वशिन्याद्यष्ट-शक्तिसहित रहस्ययोगिनी त्रिपुरा सिद्धा चक्रेश्वरी श्री पा. पू. त.॥

॥ त्रिकोणे ॥

ॐ ऐं ह्रीं श्रीं ह्स्त्रैं ह्सक्लीं ह्सौः सर्व सिद्धिप्रद चक्रस्वामिनी-महाकामेश्वर्यादि चतुःशक्ति बाणादि चतुरायुध सहितातिरहस्य योगिनी त्रिपुरांबा चक्रेश्वरी श्री पा. पू. त. ॥

॥ बिंदौ ॥

ॐ ऐं ह्रीं श्रीं क ४ ह ५ स ३ सर्वानंदमय चक्रस्वामिनी परापर रहस्य योगिनी महात्रिपुर सुंदरी चक्रेश्वरी श्री पा. पू. त. ॥

॥ इतिनवमावरणार्चनम् ॥

॥ श्री विद्या उपासकस्तु नवमावरणान्तं पूजयेत ॥

[अथ षोडशी उपासकस्तु दशमावरणार्चनं कुर्यात् ॥]

ॐ ऐं ह्रीं श्रीं चतुरस्त्रादि बिंद्वंतं नवचक्रेश्वरी पराम्बा शक्ति स्वरूपिणी सर्व मंत्रेश्वरी सर्व यंत्रेश्वरी सर्व तंत्रेश्वरी सर्व विद्येश्वरी सर्व वागीश्वरी सर्व पीठेश्वरी सर्व लोकेश्वरी सर्व

सिद्धेश्वरी सर्वयोगेश्वरी सर्वलोकोत्पत्ति स्थिति संहार मातृकाः सचक्राः समुद्राः ससिद्धयः सायुधाः सशक्तिकाः सपरिवाराः परया, अपरया, परापरया सपर्यया पूजिता-स्तर्पिताः संतुष्टाः संतुनमः ॥

ॐ ऐं ह्रीं श्रीं मूलेन देवीं त्रिः संतर्प्य ॥

सर्व संक्षोभिण्यादि त्रयोदश मुद्राः प्रदर्श ॥

॥ बिंदौ बहिर्वृत्ताकारेण पंचपंचिकाः पूजयेत् ॥

ॐ ऐं ह्रीं श्रीं मूलं पंचलक्ष्मीश्वरी वृंदमंडितासन संस्थित
सर्व सौभाग्यजननी श्रीविद्यादि पंच लक्ष्म्यांबा
श्री पा० पू० त० ॥

ॐ ऐं ह्रीं श्रीं मूलं पंचकोशेश्वरी वृंद मंडितासन संस्थित सर्व
सौभाग्यजननी श्रीविद्यादि पंच कोशांबा श्री
पा० पू० त० ॥

ॐ ऐं ह्रीं श्रीं मूलं पंचकल्पलतेश्वरी वृंदमंडितासन संस्थित सर्व सौभाग्यजननी श्रीविद्यादि पंच कल्पलतांबां श्री पा० पू० त० ॥

ॐ ऐं ह्रीं श्रीं मूलं पंचकामदुघेश्वरी वृंदमंडितासन संस्थित सर्व सौभाग्यजननी श्रीविद्यादि पंच कामदुघांबा श्री पा० पू० त० ॥

ॐ ऐं ह्रीं श्रीं मूलं पंचरत्नेश्वरी वृंदमंडितासन संस्थित सर्व सौभाग्यजननी श्रीविद्यादि पंचरत्नांबा श्री पा० पू० त० ॥

॥ इति पंचपंचिका ॥

ॐ ऐं ह्रीं श्रीं कामेश्वरी वज्रेश्वरी भगमालिनी श्री महात्रिपुरसुंदरी समयदेवता श्री पा० पू० त० ॥

|| अथ आम्नाय समष्टिमंत्राः ||

|| सृष्ट्यात्मक त्रैलोक्य मोहनादि चक्रत्रयैक्य-रूपं विभाव्य ||

ॐ ऐं ह्रीं श्रीं ह्स्ख्फ्रें ह्सक्लह्रीं ह्सौः पूर्वाम्नाय समय चतुर्विंशति सहस्रदेवता परिवारा कामगिरी पीठस्था उन्मादिनी देवता श्री पादुकां पूजयामि तर्पयामि ||

|| स्थित्यात्मक सर्व सौभाग्य दायकादि चक्रत्रयैक्य रूपं विभाव्य ||

ॐ ऐं ह्रीं श्रीं ऐं क्लिन्नेक्लिन्नमदद्रवे कुलिः ह्सौः दक्षिणाम्नाय समय षट्विंशतिसहस्रदेवता परिवारा पूर्णगिरिपीठस्था भोगिनीदेवी श्री पादुकां पूजयामि तर्पयामि ||

|| संहारात्मक सर्व रोगहरादि चक्रत्रयैक्य रूपमव्य विभाव्य ||

ॐ ऐं ह्रीं श्रीं ह्स्रौं ह्स्रौः ह्सक्षफ्रें भगवत्यंबे ह्स्क्ष्रीं ह्स्क्ष्रीं ह्स्क्लू ह्सक्षमलवरयऊं सहक्षमलवरयईं कुब्जिके अघोरेअघोर-मुखि छ्रां छ्रीं किणी किणी विच्चे ह्स्रौः ह्स्रौः श्रीं ह्रीं ऐं पश्चिमाम्नाय समय त्रिंशत् सहस्रदेवता परिवारा जालंधर

पीठस्था कुब्जिकादेवी श्री पादुकां पूजयामि तर्पयामि ॥
॥ सृष्टि स्थिति संहार चक्रत्रय रूपैक्यं विभाव्य ॥
ॐ ऐं ह्रीं श्रीं ह्स्लैं ह्सखफ्रैं महाचंड योगीश्वरी उत्तराम्नाय समय द्वात्रिंशत् सहस्र देवता परिवारा ओड्याण पीठास्था कालिका देवीश्री पादुकां पूजयामि तर्पयामि ॥
ॐ ऐं ह्रीं श्रीं मन्वपर पं महाचंड योगेश्वर ऊर्ध्वाम्नाय समय सहस्र देवता परिवारा शांभव पीठस्था श्रीमहात्रिपुर-सुंदरीश्री पादुकां पूजयामि तर्पयामि ॥
ॐ ऐं ह्रीं श्रीं श्रीं ह्रीं औं अः अं सौः अं अं ह ह्सौः अं अं सौः अं अं हं अनुत्तराम्नाय अनुत्तरविद्यात्वां श्री महा त्रिपुरसुन्दरीश्री पादुकां पूजयामि तर्पयामि ॥
ॐ ऐं ह्रीं श्रीं मूलेन धूपं दीपं नैवेद्यं फलं, तांबुलं दक्षिणां
[illegible] समर्पयेत् ॥

ॐ ऐं ह्रीं श्रीं ऋष्यादि स्मरणपूर्वकं किंचिन्मूलविद्यां जपेत् ॥

ॐ अस्यश्री विद्या महामंत्रस्य । आनंदभैरव ऋषये नमः शिरसि॥ गायत्री छंदसे नमः मुखे । श्रीविद्या महात्रिपुरसुंदरी देवतायै नमः हृदये । ऐं कएइलह्रीं बीजाय नमः गुह्ये । सौः सकलह्रीं शक्तये नमः पादयोः । क्लीं हसकहलह्रीं कीलकाय नमः सर्वांगे ।

॥ श्रीविद्या महात्रिपुरसुंदरी प्रसाद सिद्ध्यर्थे जपे विनियोगाय नमः कृतांजलिः ॥

ॐ ऐं ह्रीं श्रीं ऐं कएइलह्रीं सर्वशक्तिधाम्ने अंगु० हृदयाय नमः ।

" " क्लीं हसकहल ह्रीं नित्यतृप्तशक्तिधाम्ने तर्जं० शिरसे स्वाहा ।

" " सौः सकल ह्रीं अनादिबोध शक्तिधाम्ने मध्य० शिखायै वषट् ।

ॐ ऐं ह्रीं श्रीं ऐं कएईल ह्रीं स्वतंत्रशक्तिधाम्ने
अनामिका० कवचाय हुं ।

,, ,, क्लीं हसकहल ह्रीं नित्यमलुप्तशक्तिधाम्ने
कनि० नेत्रत्रयाय वौषट् ।

,, ,, सौः सकल ह्रीं अनंताख्यशक्तिधाम्ने
करतल० अस्त्रायफट् ।

॥ अथ ध्यानम् ॥

सकुंकुमविलेपना मलक चुंबि कस्तूरिकां
समंद हसितेक्षणां सशर चाप पाशां कुशां ।
अशेष जनमोहिनी मरुणमाल्यभूषांबरां
जपाकुसुमभासुरां जपविधौ स्मरेदंबिकाम् ॥

॥ मुद्रांगहस्त ॥

शंखं (१) चक्रं (२) गदां (३) खड्गं (४) पद्मं (५) योनि (६) त्रिशुलं (७) तार्क्ष्यं (८) धेनु (९) शक्ति (१०) शाङ्गम् (११) नाराचं (१२) कौस्तुभं (१३) श्रीवत्सं (१४) अंकुशं (१५)

॥ मुद्राः पंचदश प्रकीर्तिता ॥

(१) ॐ ऐं ह्रीं श्रीं द्रां सर्वसंक्षोभिणी ।
(२) ,, ,, द्रीं सर्वविद्राविणी ।
(३) ,, ,, क्लीं सर्वाकर्षिणी ।
(४) ,, ,, ब्लूं सर्ववशंकरी ।
(५) ,, ,, सः सर्वोन्मादिनी ।

(६) ॐ ऐं ह्रीं श्रीं क्रों सर्व महांकुशा ।
(७) ,, ,, ह्स्ख्फ्रें सर्वखेचरी ।
(८) ,, ,, ह्सौः सर्व बीजा ।
(९) ,, ,, ऐं सर्वयोनि ।
(१०) ,, ,, आं पाश ॥
(११) ,, ,, क्रों अंकुश ।
(१२) ,, ,, धं धनुः ।
(१३) ,, ,, यां रां लां वां शां शराः ॥

॥ त्रयोदश मुद्राः प्रदर्श्य ॥

॥ ऐं कएईल ह्रीं (५) क्लीं हसकहल ह्रीं (७) सौः सकल ह्रीं ॥

॥ (१८ वर्ण) मालां प्रार्थ्य ॥

॥ पुनः हृदयादिन्यास ध्यान मानस पूजनम् ॥

॥ जपं देवतायै वाम हस्ते निवेद्य ॥

स्ववामहस्ते वृत्तं चतुरस्र त्रिकोणं मंडल कृत्वा ॥ ऐं व्यापक मंडलाय नमः ॥
इति मंडलं संपूज्य ॥
तदुपरि ॥ ४ ॥ भूतबलि पात्राधाराय नमः इति आधारं संस्थाप्य ॥
॥ ४ ॥ भूतबलि पात्राय नमः इति पात्र संस्थाप्य ॥ ॐ ऐं ह्रीं श्रीं ह्रां सर्वभूतेभ्यो नमः इति भूतान् संपूज्य ॥ ॐ ऐं ह्रीं श्रीं ह्रीं सर्वविघ्नकृद्भ्यः सर्वेभ्यो भूतेभ्यो हुं फट् बलिं गृह्ण गृह्ण स्वाहा ॥ तीर्थधारां सर्वांगुलिभिर्दद्यात् ॥

॥ अथ प्रार्थना ॥

भूताये विविधाकारा दिवि भूम्यंतरिक्षगाः ।
पातालतलसंस्थाश्च शिवयोगेन भाविताः ॥

क्रूराद्याः शतसंख्याकाः पाखंडाद्या व्यवस्थिताः ।
तृप्यंतां प्रीतमनसो भूत्वा गृह्णंतु इमं बलिं ॥
॥ इति प्रार्थ्य सर्वभूतबलिं दद्यात् ॥

॥ आरातिकं कुर्यात् ॥

ॐ ऐं ह्रीं श्रीं श्रीं ह्रीं ग्लूं स्लूं म्लूं प्लूं न्लूं ह्रीं श्री
समस्त चक्रचक्रेशी युते देवी नवात्मिके ॥
आरातिक इदं तुभ्यं गृहाण मम सिद्धये ॥
इति देव्या मुखादि पादांतं त्रिर्भ्राम्य ॥

॥ ॐ ऐं ह्रीं श्रीं मूलम् ॥

बिंद्वंकित गुणकोणे तदुपरिवसुकोणे ।
दशार युग्मे भगवति भूतमनुकोणे ॥
चेतः क्रीडति चाष्टौ षोडशदल रम्ये ।
[illegible] चत्वारि गृह रम्ये ॥

जयदेवि जयदेवि जयमातस्त्रिपुरे ।
दीपावलिमवलोकय मामव सुखसारे ।
जयदेवि जयदेवि ॥ १ ॥

रेखात्रय परिनिमित निगमद्वारयुते ।
सुवर्ण मणिगणखचिते श्रीचक्रे युवते
ब्रह्मादिक मयमंचक मृद्वासनखचिते ।
तदुपरिभूषण सायुध कामेश्वरसहिते ॥
जयदेवि जयदेवि० ॥ २ ॥

अंकुश पाशशरासनशरशोभितहस्ते ।
किशोरवेषालंकृत त्रिपुरेशि नमस्ते ।
स्वर्णाभरण सुदेहेऽरुण कंचुकिचैले ।
विधेहि शिवपद चिद्घनचिद्रस कल्लोले ॥
जयदेवि जयदेवि ॥ ३ ॥

*

जयनाथ जयनाथ जयश्री सद्गुरुमूर्ते
हरममतिदुर्वार्तां हृदिसंवृतमूर्ते ॥ जयनाथ जयनाथ० ॥१॥
उन्मन्यामपि परतो निवसस्थलि कूटे
दशशतदलसरसीरुह शशिमय मणिहाटे ।
अकथादिक रेखात्रय कलिते शृंगाटे
अंतःकोण त्रयगत हळक्ष मणिपीठे ॥ जयनाथ० ॥ २ ॥
नाथवराभय मुद्रा वितरण कलित करा
नभवति देवांतरसम ममदेवी त्रिपुरा ।
तन्मुद्रे तदभिन्ने त्वयिसतिकमति परा
तस्मात्देशिकवरमयि कथमिह जन्म जरा ॥ जयनाथ० ॥ ३ ॥
तव पादांबुजमुद्रां साधनतो बद्ध्वा
योनेर्मुद्रां बद्ध्वा पवनावपि रुद्ध्वा ।
अहमस्यं शिव मध्वा वेशोत्थ वद्ध्वाऽऽ

मात र्योनि सहस्त्रेषु येषु येषु व्रजाम्यहं ।
तेषु तेषु अच्युता भक्तिः तव पादाब्ज सेविनः ॥
॥ इतिमूलेन मंत्रपुष्पांजलिं दद्यात् ॥
यत्रैव यत्रैव मनोमदीयं तत्रैव तत्रैव तवस्वरूपं ।
यत्रैव यत्रैव शिरोमदीयं तत्रैव तत्रैव पदद्वयंते ॥
॥ ॐ ऐं ह्रीं श्रीं मूलेन साष्टांगं प्रणमेत ॥
आपदि किं करणीयं चरणयुगलमंबायाः ।
तत् स्मरणं किं कुरुते ब्रह्मादीनपि किंकरी कुरुते ॥
पातय वा पाताले स्थापय वा सकललोक साम्राज्ये ।
मातस्तव पदयुगलं नाहं मुंचामि नैवमुंचामि ॥
॥ मूलं पुनः पुनः साष्टांगं प्रणम्य प्रार्थ्य ॥
मूलेन सुवासिनी कुमारिका बटुक वीर सामायिकानां
पूजां कृत्वा ॥ तीर्थ प्रसादं दत्वा दक्षिणादिभिः संतोषयेत् ।

॥ ॐ ऐं ह्रीं श्रीं मूलेन श्री मन्महात्रिपुर सुन्दरी देवतायै नमः छत्रं समर्पयामि ॥ ४ मूलं श्रीमन्महाः चामरं ४ मूलं गीतं ॥ ४ मूलं वाद्यं ॥ ४ मूलं नृत्यं ॥ ४ मूलं श्रीमन्महाः सर्वोपचारान् राजोपचारान् समर्पयामि ॥

॥ अथ उद्वार्चनम् ॥

ॐ ऐं ह्रीं श्रीं साधुवा साधुवा कर्म यद् यद् आचरितं मया ।
तत्सर्वं कृपयादेवि गृहाणाराधनं मम ॥

इति मंत्रेण शंखोदक देव्युपरि त्रिः परिभ्राम्य अवशिष्ट-जलेनस्वात्मानंप्रोक्ष्य ॥

त्रिकोण वृत्तं चतुरस्रात्मकं मंडलपूर्वकं उच्छिष्ट भूतबलिपात्रं स्थापयित्वा । श्री देव्युपरि निर्माल्य किंचिन्नैवेद्य शेषं एकपात्रे निधाय ॥

लेह्य चोष्य च पानादि तांबुलं स्रग्विलेपनं निर्माल्य भोजने तुभ्यं ददामि श्री शिवाज्ञया ॥

ॐ ए ह्रीं श्रीं ऐं नमः उच्छिष्ट चांडालि मातंगी सर्ववशंकरि उच्छिष्ट बलि गृह्ण गृह्ण स्वाहा ॥ इति बलि दत्वा ॥

ॐ ऐं ह्रीं श्रीं रश्मिरूपा महादेवी अत्र सर्वत्र पूजिता । श्रीसुन्दरी अंगुलि स्नाताः संतुसर्वेशुभावहाः ॥

॥ इति देव्यु प र पुष्पं संहारमुद्रया गृहीत्वा तत्सव तेजो चतन्यमयं पुष्प माघ्राय ब्रह्मरंध्रे संस्थाप्य मानसोपचारैसंपूजयेत॥

॥ मूलेन श्रीपात्रमुद्धृ य स्वशिरसि निधाय प्रणम्य ॥

॥ पूर्वस्थाने स्थापयित्वा श्रीगुरुदेवताः संतर्प्य स्वीकृत्य ॥

गृहाद्बहिः मंडलपूर्वकं सर्वभूतबलि पूजनं विसर्जनं च कर्तव्यं ॥

वामहस्ते मूलेन बिंदु सामान्योदक च गृहीत्वा शांति स्तव पठेत् ॥

व्याधयस्तस्य नश्यंति जीवेद् वर्षं शतंसुखी ।
विहृत्य भुवने स्वैरं सोमरेतमवाप्नुयात् ॥

इति शांतिस्तवेन करस्थ जलबिंदुभिः सर्वान् प्रोक्ष्य ।

कराभ्यां कलशमुधृत्य शिरसि स्थित गुरवे निवेद्य त्रिः संतर्प्य । तज्जलं सर्वपात्रांतरे कृत्वा स्वाहांतमूलेन मूलाधारस्थ कुंडलिन्यात्मके परदेवतामुखे हवन बुध्या प्राश्य शेषं प्रियशिष्याय दद्यात् ।

॥ इति अवशिष्टद्रव्यप्रतिपत्तिः ॥

॥ ततः सूर्याय अर्घ्यं दद्यात् ॥

ॐ ऐं ह्रीं श्रीं ॐ ह्रां ह्रीं सः मार्तंडभैरवाय प्रकाशरश्मिशक्ति सहिताय पयोर्घ्यः स्वाहा ॥ त्रिवारं अर्घ्यं दद्यात् ॥

॥ गुरु स्तोत्रं पठेत् ॥

नमस्ते नाथ भगवन शिवाय गुरुरूपिणे ।
विद्यावतार संसिद्ध्यैः स्वीकृतानेकविग्रहं ॥
नवाय नवरूपाय परमार्थैश्वरूपिणे ।
सर्वज्ञान तमो भेद भानवे चिद्घनायते ॥
स्वतंत्राय दया क्लृप्त विग्रहाय शिवात्मने ।
परतंत्राय भक्तानां भवाय भवरूपिणे ॥
विवेकिनां विवेकाय विमर्शाय विमर्शिनां ।
प्रकाशिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ॥
पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यात् उपर्यधः ।
सदासच्चित् स्वरूपेण विधेहि भवदासनम् ॥

। इदमेव स्तोत्रं जपेत् ।

द्वितीय कुटने निर्माल्यं शिरसि धृत्वा ।

। मूलेन चरणोदकं पीत्वा नैवेद्यादिकं देवीभक्तेभ्यो दत्वा

स्वयमपि भुक्त्वा स्वात्मानं देवीरुपं विभाव्य ।

यस्य स्मृत्या च नामोक्त्या तपोजप क्रिया दिषु ।

न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

स्वदक्षिणभागे उच्छिष्ट भैरवबलिपात्रं स्थापयित्वा ॐ ऐं ह्रीं श्रीं उच्छिष्ट भैरवाय नमः । उच्छिष्ट भैरव उच्छिष्ट बलिं गृह्ण गृह्ण स्वाहा ॥ इति उच्छिष्टं दद्यात्

॥ इति शिवम् ॥

॥ यथा सुखं विहरेत् ॥

॥ हरि ॐ तत्सत् ॥

॥ श्री गुं गुरुभ्यो नमः ॥

परिशिष्ट १

द्वादशद्वारदेवता १२

१ अविघ्न, २ महालक्ष्मी, ३ सरस्वती, ४ गणपति, ५ क्षेत्रपाल, ६ गंगा, ७ यमुना, ८ धात्री, ९ विधात्री, १० शंखनिधि, ११ पद्मनिधि, १२ अस्त्रदेवी ॥

दशवह्निकला १०

१ धूम्रार्चिः, २ उष्मा, ३ ज्वलिनी, ४ ज्वालिनी, ५ विस्फुलिंगिनी, ६ सुश्रिया, ७ सुरूपा, ८ कपिला, ९ हव्यवाहिनी, १० कव्यवाहिनी ॥

द्वादशसूर्यकला १२

१ तपिनी, २ तापिनी, ३ धूम्रा, ४ मरीचि, ५ ज्वालिनी, ६ रुचि, ७ सुषुम्ना, ८ भोगदा, ९ विश्वा १० बोधिनी, ११ धारिणी, १२ क्षमा ॥

ब्रह्मदशकला १०

१ सृष्टि, २ ऋद्धि, ३ स्मृति, ४ मेधा, ५ कांति, ६ लक्ष्मी, ७ द्युति, ८ स्थिरा, ९ स्थिति, १० सिद्धि ॥

षोडश सोमकला १६

१ अमृता, २ मानदा, ३ पूषा ४ तुष्टि ५ पुष्टि, ६ रति, ७ धृति ८ शशिनी, ९ चंद्रिका, १० कांति, ११ ज्योत्स्ना, १२ श्री, १३ प्रीति, १४ अंगदा, १५ पूर्णा, १६ पूर्णामृता ॥

विष्णुदशकला १०

१ जरा, २ पालिनी, ३ शांति, ४ ईश्वरी ५ रति, ६ कामिनी, ७ वरदा, ८ आल्हादिनी, ९ प्रीति, १० दीर्घा ॥

रुद्रदशकला १०

१ तीक्ष्णा, २ रौद्री ३ भया ४ निद्रा, ५ तंद्रा, ६ क्षुधा ७ क्रोधिनी ८ क्रिया ९ उद्गारी, १० मृत्यु ॥

बिंदीश्वरपंचकला ५

१ पीना, २ श्वेता, ३ अरुणा, ४ असिता, ५ अनंता ॥

सदाशिवषोडशकला १६

१ निवृत्ति, २ प्रतिष्ठा, ३ विद्या, ४ शांति, ५ इंधिका, ६ दीपिका, ७ रोचिका, ८ मोचिका ९ परा, १० सूक्ष्मा, ११ सूक्ष्मामृता, १२ ज्ञाना, १३ ज्ञानामृता, १४ आप्यायिनी, १५ व्यापिनी, १६ व्योमरूपा ॥

पीठे ९

१ मंडूक, २ कालग्नि, ३ मूलप्रकृति, ४ आधारशक्ति, ५ कूर्म, ६ अनंत, ७ वराह ८ वराहदंष्ट्राग्र ९ पृथिवी ॥

चतुः समुद्राः ४

१ इक्षु, २ मदिरा ३ घृत, ४ क्षीर ॥

नवरत्नः ९

१ पुष्पराग, २ नील, ३ वैडूर्य, ४ विद्रुम, ५ मौक्तिक, ६ गोमेद, ७ पद्मराग, ८ वज्र, ९ मरकत ॥

स्वर्णपर्वतादिविचित्ररत्न भूमिकान्त ७

१ स्वर्णपर्वत, २ नन्दनोद्यान, ३ कल्पवृक्षवाटिका, ४ वसंतादिषड्ऋतु ५ इंद्रियाश्व, ६ इंद्रियार्थगज, ७ विचित्र-रत्नभूमिका ॥

विष्णुदशकला १०

१ जरा, २ पालिनी, ३ शांति, ४ ईश्वरी ५ रति, ६ कामिनी, ७ वरदा, ८ आल्हादिनी, ९ प्रीति, १० दीर्घा ॥

रुद्रदशकला १०

१ तीक्ष्णा, २ रौद्री ३ भया ४ निद्रा, ५ तंद्रा, ६ क्षुधा ७ क्रोधिनी ८ क्रिया ९ उद्गारी, १० मृत्यु ॥

ईश्वरपंचकला ५

१ पीता, २ श्वेता, ३ अरुणा, ४ असिता, ५ अनंता ॥

सदाशिवषोडशकला १६

१ निवृत्ति, २ प्रतिष्ठा, ३ विद्या, ४ शांति, ५ इंधिका, ६ दीपिका, ७ रेचिका, ८ मोचिका ९ परा, १० सूक्ष्मा, ११ सूक्ष्मामृता, १२ ज्ञाना, १३ ज्ञानामृता, १४ आप्यायिनी, १५ व्यापिनी, १६ व्योमरूपा ॥

पीठे ९

१ मंडूक, २ कालग्नि, ३ मूलप्रकृति, ४ आधारशक्ति, ५ कूर्म, ६ अनंत, ७ वराह ८ वराहदंष्ट्राग ९ पृथिवी ॥

चतुः समुद्राः ४

१ इक्षु, २ मदिरा ३ घृत, ४ क्षीर ॥

नवरत्नः ९

१ पुष्पराग, २ नील, ३ वैडूर्य, ४ विद्रुम, ५ मौक्तिक, ६ गोमेद, ७ पद्मराग, ८ वज्र, ९ मरकत ॥

स्वर्णपर्वतादिविचित्ररत्न भूमिकान्त ७

१ स्वर्णपर्वत, २ नन्दनोद्यान, ३ कल्पवृक्षवाटिका, ४ वसंतादिषडृतु ५ इंद्रियाश्व, ६ इंद्रियार्थगज, ७ विचित्र-रत्नभूमिका ॥

नवचक्रेश्वरी ९

१ कालचक्रेश्वरी, २ मुद्राचक्रेश्वरी, ३ मातृचक्रेश्वरी, ४ देशचक्रेश्वरी, ५ रत्नचक्रेश्वरी, ६ गुरुचक्रेश्वरी, ७ तत्त्व-चक्रेश्वरी ८ ग्रहचक्रेश्वरी, ९ मूर्तिचक्रेश्वरी ॥

करुणातोयपरिघादिरत्नसिंहासनान्त ११

१ करुणतोयपरिघ, २ स्वर्णप्राकार, ३ मणिमयमंडप, ४ कालरूपिणी शक्ति, ५ देश रूपिणी शक्ति, ६ आकाश-रूपिणी शक्ति ७ शब्दरूपिणी शक्ति, ८ संगीतयोगिनी, ९ मणिमय वेदिका ,१० श्वेतच्छत्र, ११ रत्नसिंहासन ॥

पंचब्रह्मासन ५

१ ब्रह्मा २ विष्णु ३ रुद्र ४ ईश्वर ५ सदाशिव ॥

ज्ञानादि पंचतत्त्व

१ ज्ञान २ माया ३ कला ४ विद्या ५ पर ॥

पंचपंचिका

१ पंच लक्ष्म्यंबा : १ श्री विद्या, २ लक्ष्मी, ३ महालक्ष्मी, ४ त्रिशक्ति, ५ साम्राज्यलक्ष्मी ॥

२ पंच कोशाम्बा : १ श्री विद्या, २ परंज्योति, ३ पर निष्कल शांभवी, ४ अजपा, ५ मातृका ॥

३ पंच कल्पलताम्बा : १ श्री विद्या, २ पंचकामेश्वरी, ३ पंचलतेश्वरी, ४ कुमारी, ५ पंचबाणेश्वरी ॥

४ पंच कामदुघाम्बा : १ श्री विद्या, २ अमृतपीठेश्वरी, ३ सुधासूः ४ अमृतेश्वरी, ५ अन्नपूर्णा ॥

५ पंच रत्नाम्बा : १ श्री विद्या २ सिद्ध लक्ष्मी ३ मातंगी ४ भुवनेश्वरी ५ वाराही ॥

॥ श्री गुंगुरुभ्यो नमः ॥

॥ स्तोत्रम् ॥

गणेशग्रहनक्षत्र योगिनीं राशिरूपिणीम् ।
देवीं मंत्रमयीं नौमि मातृकां पाठरूपिणीम् ॥ १ ॥

प्रणमामि महादेवीं मातृकां परमेश्वरीम् ।
कालहल्लोहलोल्लोलकलनाशमकारिणीम ॥ २ ॥

यदक्षरैकमात्रेपि संसिद्धे स्पर्धते नरः ।
रवितार्क्ष्येन्दुकंदर्पशंकरानल विष्णुभिः ॥ ३ ॥

यदक्षरमहासुत्रप्रोतमेतज्जगत्रयम् ।
वंदेसवश्वरीं देवींमहाश्री सिद्धमातृकाम् ॥ ४ ॥

यदक्षर महासुत्र प्रोतमेतज्जगत्रयम ।
ब्रह्माण्डादिकटाहान्तं तांवंदे सिद्धमातृकाम् ॥ ५ ॥

यदेकादशमाधारं बीजं कोण त्रयोद्भवम् ।
ब्रह्माण्डादि कटाहान्तं जगदद्यापि दृश्यते ॥ ६ ॥

अकचादिटतोन्नद्ध पयशाक्षर वर्गिणीम् ।
ज्येष्ठांगबाहुपादाग्रमध्यस्वान्तनिवासिनीम् ॥ ७ ॥

तामीकाराक्षरोद्धारां सारात्सारां परात्पराम् ।
प्रणमामि महादेवीं परमानन्दरूपिणीम् ॥ ८ ॥

अद्यापि यस्या जानन्ति न मनागपि देवताः ।
केयं कस्मात्क्वकेनेति सरूपा रूपभावनाम् ॥ ९ ॥

वंदे तामहमक्षय्या मकाराक्षररूपिणीम् ।
देवीं कुलकलोल्लोलप्रोल्लसन्तींपरांशिवाम् ॥ १० ॥

वर्गानुक्रमयोगेण यस्यां मातृष्टकंस्थितम् ।
वन्देतामष्टवर्गोत्थ महासिद्ध्यष्टकेश्वरीम् ॥ ११ ॥

कामपूर्णजकाराद्य श्री पीठान्तर्निवासिनीम् ।
चतुराज्ञाकाशभूतां नौमि श्री त्रिपुरामहम् ॥१०॥

इति श्री वामकेश्वरतंत्रांतर्गत नित्यषोशिकार्णवे
प्रथमविश्रामे स्तुति स्तोत्रम् ॥

॥ श्रीगुरुदेवतार्पणमस्तु ॥

॥ हरिः ॐ तत्सत् ॥

卐 ૐ 卐

શ્રીમન્મહાત્રિપુરસુંદરીની

સ્તુતિ

શ્રી અંબિકા શિશ ધરું ચરણે તમારે
બાલા ભવાની ભજવા ઉરમાં હમારે
નિત્યે ભજું હર નિશા સમયે હું નામ
શ્રી ચક્રબિન્દુ ત્રિપુરેશ્વરીને પ્રણામ

કાલિ કૃપાલી કરુણા કરજે તું આજે
સૃષ્ટિ વિષે અતિ કર્યાં વિઘ્નો પરાજે
કલ્યાણ થાય જગમાં અતિ હર્ષ કામ
શ્રી ચક્રબિન્દુ ૨

કામેશ્વરી તું કપિલા કમલાજ ધાત્રી
સિદ્ધેશ્વરી શિવદુતિ લલિતા જ માત્રી
તારા સદા સરસ્વતી સતી સર્વ નામ
શ્રી ચક્રબિન્દુ ૩

ચંડી નમું ચરણ આ નવદુર્ગાને
જ્વાલામુખી જ સચરાચર માને ધ્યાને
પામું પરાત્પર પદે અતિ હું વિરામ
શ્રી ચક્રબિન્દુ ૪

સિંહાસને પુરણ આ પદવી પ્રમાણું
પાદારવિંદ નમી સત્ય હું ચિત્ત આણું
દેવી ગિરેશ ત્રિપુરેશ્વરી આત્મરામ
શ્રી ચક્રબિન્દુ ૫

સાન્નિધ્ય સત્ય વદિયા પરબ્રહ્મ દેવા
શક્રાદિ આદિ કરતા હરનિશ સેવા
પ્રાણી પશુ કરગરે ધરીને જ હામ
શ્રી ચક્રબિન્દુ ૬

સર્વ સ્થળે વસી રહ્યાં જગદંબ આજે
ત્રૈલોક્ય પાલન કરી જગમાં બિરાજે
ભક્તોનુ પાલન કરો સતી સર્વ ઠામ
શ્રી ચક્રબિન્દુ ૭

સંસારમાં સકલ મંગલ કાર્ય થાય
સંકષ્ટ વિઘ્ન ભય દુઃખ સમસ્ત જાય
રાખુ નિરંતર ચિત્ત બહુ તારી હામ
શ્રી ચક્રબિન્દુ ૮

સંધ્યા સમે જપ જપે ધરી મુખ પાઠે
બાલાની આ સ્તુતિ કરે ભણી શ્લોક આઠે
અંતે મળે સમીપ મુક્તિ તણું જ ધામ
શ્રી ચક્રબિન્દુ ૯

ॐ

शुद्धिपत्रक

पृष्ट	पंक्ति	अशुद्धि	शुद्धि
२	१२	प	पँ
१३	२	श्री	श्रीं
१३	४	विनियोगाय	जपे विनियोगाय
१४	८	तिरस्कारिणि	तिरस्करिणि
१५	५	(अ) विघ्नराजादि अस्त्रदेव्यंत ॥	(शु) अविघ्नराजादि अस्त्रदेव्यंतद्वादशदेवताभ्योनमः॥
१६	१२	स्थित	स्थितः
२०	१	प	पँ
२१	१	क्लीं	पँ क्लीं क्लिन्ने
२१	४	ह्रां श्रां	[illegible]

२२	८	गोदावरी	गोदावरि
२२	११	गंगाविके	गंगांबिके
२३	९	प	पँ
२४	७	सुयकलावत	सूर्यकलावत
२४	८	साममंडलाय	सोममंडलाय
२५	१	फलात्मने	कलात्मने
२६	६	हं ळ क्ष	हं ळं क्षं
२६	त्रिकोणे :	लं स्थाने	ळं पठते
२७	३	सहक्षमलवरइं	सहक्षमलवरईं
३०	१२-१४	सुधादेव्या	सुधादेव्याः
३१	४	हस्रौ	हस्रौः
३१	५-७-१३	प	पँ
३१	१०	भगवात	भगवति
३२	५	दवौ	देव्यै

३२	६-८-१०	प	पँ
३३	१३	पँहांश्री	पँह्रींश्री
३४	६	त्रिपद्माधारा	त्रिपद्माधारं
३८	६	(अस्पष्ट)	संकल्पविकल्प
३९	६	दिग्गुग्मस्वनल	दिग्गुग्मवस्वनल
४०	३	प	पँ
४०	३	ह्म	हस्त्रैं
४०	०	सकलह्रां	सकलह्रीं
४१	१	ह्रैह	ह्रैंह्रीं
४३	१३	(अस्पष्ट)	शिवाशक्ति
४७	१०	न्येनंग	न्यनंग
४८	२	हुक्लीं	हैं ह्क्लीं
५३	१३	(अस्पष्ट)	राजोपचारान्
५५	२	कपट्टल	कपर्द्दल

६७	२	लाकय	लौकय
६४	१	लेह्य चोष्य	लेह्यं चोष्यं
६४	७	पर	परि
६४	७	तत्सव	तत्सर्वं
६४	८	चतन्यमयं	चैतन्यमयं
६४	१२	सामान्कोदक	सामान्योदक
६४	१२	स्तव	स्तवः
६६	४	प्रमाणु	प्रणाम

लोकय लोकय

लेह्य चोष्य लेह्यं चोष्यं

परि

प्राप्तिस्थान

१ श्री नारायण सीताराम भट्ट बी.अे. अेलअेल.बी., अेडवोकेट
१३७१/A सदाशिव पेठ पूना ३० (महाराष्ट्र)

२ श्री महाशंकर घेलाभाई शुक्ल (अग्निहोत्री)
वागीश्वरी पोळ, सोनीफलिया, सुरत–१

३ श्री सोमनाथ नंदशंकर भट्ट
नानी छीपवाड, अंबाजीरोड, सुरत–१

४ श्री नारायणस्वामी आश्रम
शिवकुटिर नर्मदनगर अठवालाईन्स, सुरत–१

५ श्री कपिलराय नानालाल ठाकुर (प्रकाशक)
२ सूर्यसदन बेसंट होल, सुरत–१

लेह्य चोष्य   लेह्यं चोष्यं

परि

प्राप्तिस्थान

१ श्री नारायण सीताराम भट्ट बी अे. अेलअेल.बी., अेडवोकेट
१३७१/A सदाशिव पेठ पूना ३० (महाराष्ट्र)

२ श्री महाशंकर घेलाभाई शुक्ल (अग्निहोत्री)
वागीश्वरी पोळ, सोनीफलिया, सुरत-१

३ श्री सोमनाथ नंदशंकर भट्ट
नानी छीपवाड, अंबाजीरोड, सुरत-१

४ श्री नारायणस्वामी आश्रम
शिवकुटिर नर्मदनगर अठवालाईन्स, सुरत-१

५ श्री कपिलराय नानालाल ठाकुर (प्रकाशक)
२ सूर्यसदन बेसंट होल, सुरत-१